vyāpakapavanaśvasitaṁ daivaṁ
pārāvārasvedaṁ daivam.

13. līlānārīveṣaṁ daivaṁ
divyahiraṇmayabhūṣaṁ daivam
keṣāñcitkṛtapoṣaṁ daivaṁ
keṣāñcitkṛtaśoṣaṁ daivam.

14. poṣavidhāne śītaṁ daivaṁ
śoṣavidhāne tapanaṁ daivam
sargavidhāne vikasaddaivaṁ
pralayavidhāne mīladdaivam.

15. somaṁ pītvā puṣṭaṁ daivaṁ
dviṣato hatvā hṛṣṭaṁ daivam
bhuvanapralaye śiṣṭaṁ daivam
sarvapadārthotkṛṣṭaṁ daivam.

16. kaulācāriṣu mādyaddaivaṁ
samayācāriṣu śāntaṁ daivam
yogācāriṣu pīnaṁ daivaṁ
jñānācāriṣu līnaṁ daivam.

17. kāmavirodhi kalatraṁ daivaṁ
gaṇapaṣaḍānanaputraṁ daivam
pāpavidāri pavitraṁ daivaṁ
jayati munistutipātraṁ daivam.

6. cālakamavaneḥ śaktyāḥ daivaṁ
śampādvārā dṛśyaṁ daivam
dogdhrimanuvaravācyaṁ daivaṁ
vidadhadvinatamaśocyaṁ daivam.

7. śaile śaile viharaddaivaṁ
vipine vipine vicaraddaivam
grāme grāme khyataṁ daivaṁ
nagare nagare prathitaṁ daivam.

8. parito vyomni nirākṛti daivaṁ
svarge paulomyākṛti daivam
himavati gaurīrūpaṁ daivaṁ
tanuṣu prāṇākāraṁ daivam.

9. ardhaṁ suragiridhanuṣo daivaṁ
bhuvanatritaye pūrṇaṁ daivam
hṛdi bhūtānāṁ kiñciddaivaṁ
tṛṇavanmanasi pracuraṁ daivam.

10. lajjābhāvo lalitaṁ daivaṁ
rasanābhāvo bhīmaṁ daivam
dṛṣṭau dṛṣṭau sūkṣmaṁ daivaṁ
viṣaye viṣaye sthūlaṁ daivam.

11. stotre stotre madhuraṁ daivaṁ
dhyāne dhyāne madakṛddaivam
namane namane varadaṁ daivaṁ
carite carite pūtaṁ daivam.

12. ākāśāmalagātraṁ daivaṁ
tārāraviśaśinetraṁ daivam

## saptamam ambikāgītam

1. sevakapātakaśamanaṁ daivaṁ
mānasavāñchitaphaladaṁ daivam
sajjanarakṣaṇacaturaṁ daivaṁ
durjanamardanaparuṣaṁ daivam.

2. bhāskarabimbe dīptaṁ daivaṁ
locanamadhye suptaṁ daivam
sitakaramaṇḍalaguptaṁ daivaṁ
triguṇitabhuvanavyāptaṁ daivam.

3. bahuśataceṭīsahitaṁ daivaṁ
reṇusamaṣṭyā vihitaṁ daivam
ambarasaudhe nihitaṁ daivaṁ
bhairavavadanā'bhihitaṁ daivam.

4. asurucipadyābhūtam daivaṁ
vasurudrārkairgītaṁ daivam
kṣitijalaśuciṣuprotaṁ daivaṁ
śītamatibhiḥ samadhītaṁ daivam.

5. mṛduhṛdayānāṁ saumyaṁ daivaṁ
priyarūpāṇāṁ ramyaṁ daivam
tattvajñānāṁ viśvaṁ daivaṁ
guṇavirucīnāṁ śūnyaṁ daivam.

13. लीलानारीवेषं दैवम्
दिव्यहिरण्मयभूषं दैवम् ।
केषांचित्कृतपोषं दैवम्
केषांचित्कृतशोषं दैवम् ॥

14 पोषविधाने शीतं दैवम्
शोषविधाने तपनं दैवम् ।
सर्गविधाने विकसद्दैवम्
प्रलयविधाने मीलद्दैवम् ॥

15 सोमं पीत्वा पुष्टं दैवम्
द्विषतो हत्वा हृष्टं दैवम् ।
भुवनप्रलये शिष्टं दैवम्
सर्वपदार्थोत्कृष्टं दैवम् ॥

16 कौलाचारिषु माद्यद्दैवम्
समयाचारिषु शान्तं दैवम् ।
योगाचारिषु पीनं दैवम्
ज्ञानाचारिषु लीनं दैवम् ॥

17 कामविरोधिकलत्रं दैवम्
गणपषडाननपुत्रं दैवम् ।
पापविदारिपवित्रं दैवम्
जयति मुनिस्तुतिपात्रं दैवम् ॥

Ardham

9. अर्धं सुरगिरि धनुर्लो देवम्
भुवनत्रितयेपूर्णं देवम् ।
हृदि भूतानां किंचिद्देवम्
तृणवन्मनसि प्रचुरं देवम् ॥

10. लज्जाभावे ललितं देवम्
रसनाभावे भीमं देवम् ।
दृष्टौ दृष्टौ सूक्ष्मं देवम्
विषये विषये स्थूलं देवम् ॥

11 स्तोत्रे स्तोत्रे मधुरं देवम्
ध्याने ध्याने मदकृद्देवम् ।
नमने नमने वरदं देवम्
चरिते चरिते पूतं देवम् ॥

12 आकाशमलगात्रं देवम्
तारारविशशिनेत्रं देवम् ।
व्यापकपवनश्वसितं देवम्
पारावारस्वेदं देवम् ॥

5. मृदुहृदयानां सौम्यं दैवम्
प्रियरूपाणां रम्यं दैवम् ।
तत्त्वज्ञानां विश्वं दैवम्
गुणविरुचीनां शून्यं दैवम् ॥

6. चालकमवने: शक्त्या दैवम्
शम्पाद्वारा दृश्यं दैवम् ।
दोग्ध्रीमनुवर वाच्यं दैवम्
विदग्धद्विनतम शोच्यं दैवम् ॥

7. शैले शैले विहरद्दैवम्
विपिने विपिने विचरद्दैवम् ।
கூwaகும் 2 ग्रामे ग्रामे रथ्यातं दैवम्
नगरे नगरे प्रार्थितं दैवम् ॥

8 परितो व्योम्नि निराकृति दैवम्
स्वर्गे पौलोम्याकृति दैवम् ।
हिमवति गौरीरूपं दैवम्
तनुभुप्राणाकारं दैवम् ॥

# सप्तमं अम्बिकागीतम्

1. सेवकपातकशमनं दैवम्
मानसवाञ्छितफलदं दैवम् ।
सज्जनरक्षणचतुरं दैवम्
दुर्जनमर्दनपरुषं दैवम् ॥

2. भास्करबिम्बेदीप्तं दैवम्
लोचनमध्ये सुप्तं दैवम् ।
सितकरमण्डलगुप्तं दैवम्
त्रिगुणितभुवनव्याप्तं दैवम् ॥

3. बहुशतचेटीसहितं दैवम्
रेणुसमष्ट्या विहितं दैवम् ।
अम्बरसौधे निहितं दैवम्
भैरववदनाभिहितं दैवम् ॥

4. असुरुचिपद्माभूतं दैवम्
वसुरुद्रार्कैर्गीतं दैवम् ।
क्षितिजलशुचिबुप्रोतं दैवम्
शितमतिभिः समधीतं दैवम् ॥